प्रौढमनोरमा – अच्सन्धिप्रकरणम्

परीक्षा

समयः – १.५ घण्टा **अङ्काः – ५०**

I. मनोरमाकारस्य सिद्धान्तानुगुणं सूक्तमुत्तरं चिनुत । 1x10 = 60

१. 'इको यणचि' इत्यत्र आदेशनिर्णयः कथम्?

अ) यथासंख्यमनुदेशः समानाम्

आ) स्थानेऽन्तरतमः

इ) अलोऽन्त्यस्य

ई) येन विधिस्तदन्तस्य

२. दीर्घात् परस्य यरः द्वित्वं

अ) नित्यं भवति

आ) विकल्पेन भवति

इ) न भवति

ई) क्वचित् भवति

३. 'अचः परस्मिन् पूर्वविधौ' इति सूत्रेण कीदृशः अतिदेशः भाष्यकारसम्मतः?

अ) भावातिदेशः

आ) अभावातिदेशः

इ) उभयातिदेशः

ई) कार्यातिदेशः

४. असिद्धपरिभाषा

अ) त्रिपाद्यां प्रवर्तते

आ) त्रिपाद्यां न प्रवर्तते

इ) यथोद्देशपक्षे एव त्रिपाद्यां प्रवर्तते

ई) कार्यकालपक्षे एव त्रिपाद्यां प्रवर्तते

५. 'यणः प्रतिषेधो वाच्यः' इति वार्त्तिकस्य प्रत्याख्यानपक्षे 'गिरिवेश्म्' इत्यस्य प्रथमैकवचने किं रूपं स्यात्?

अ) गिरिवेट्

आ) गिरिवेश्म्

इ) गिरिवेश्

ई) गिरिवेश्म

६. 'अन्तादिवच्च' इति सूत्रम्

अ) अल्विध्यर्थम्

आ) अभावातिदेशार्थम्

इ) तादूप्यातिदेशार्थम्

ई) अनपेक्षितम्

७. 'एत्येधत्यूठसु' इति सूत्रे अनुवृत्तम् एज्ग्रहणं कस्य विशेषणम्?

अ) एतेरेव

आ) एधतेरेव

इ) एत्येधत्योः

ई) सर्वेषाम्

८. धात्रंशः इत्यत्र रेफस्य द्वित्वं केन वार्यते?

अ) 'शरोऽचि' इति सूत्रेण

आ) 'कार्यी निमित्ततया नाश्रीयते' इति परिभाषया

इ) 'सर्वत्र शाकल्यस्य' इति सूत्रेण

ई) 'यणः प्रतिषेधो वक्तव्यः' इति वार्त्तिकेन

९. 'अनल्विधौ' इत्यस्य कः विग्रहः दीक्षितस्य असम्मतः

अ) अलि विधिः

आ) अला विधिः

इ) अलः विधिः

ई) अलं विधिः

१०. 'अनचि च' इति विधीयमानं द्वित्वं

अ) नित्यम्

आ) वैकल्पिकम्

इ) क्वचिद् अनित्यम्

ई) प्रत्याख्यातम्

II. अधोदत्तानां पङ्क्तीनामाशयं विवृणुत । (चतसृणामेव) । 4x3 = 12

१. प्रत्याहारेषु तद्वाच्यवाच्ये निरूढा लक्षणा।

२. पूर्वत्वमुपलक्षणं न तु विशेषणमिति भावः।

३. वृत्तौ हि उपसर्जनानाम् एकत्वसंख्या औत्सर्गिकी, द्वित्वादिकं तु प्रयत्नलभ्यमिति भाष्ये स्थितम्।

४. त्यज वा पञ्चमादीनि रूपाणि, स्वीकुरु वा रूपानन्त्यम्।

५. तस्मात् सीरदेवोक्तं ज्ञापकमपि सम्यगेव।

६. अनवक्लृप्तौ यदा दृष्टः पररूपस्य गोचरः। एवस्तु विषयो वृद्धेः नियमेऽयं यदा भवेत्।

III. प्रौढमनोरमानुसारेण उत्तरयत (पञ्च एव) । 5x4 = 20

१. 'त्रिप्रभृतिषु शाकटायनस्य'. 'सर्वत्र शाकल्यस्य', 'दीर्घादाचार्याणाम्' इति सूत्रत्रयम् आवश्यकम् उत न? समर्थयत।

२. 'स्थानिवदादेशोऽनल्विधौ', 'अचः परस्मिन् पूर्वविधौ' – सूत्रद्वयाभ्यां विहिते अतिदेशे के भेदाः?

३. 'न पदान्तद्विर्वचन...' सूत्रे पदान्तशब्दस्य कीदृशः अर्थः स्वीक्रियते? सप्रमाणं विवृणुत।

४. 'सुध्युपास्यः' इत्यत्र यण्निषेधम् आशङ्क्य समाधत्त।

५. झरो झरि सवर्णे इति विधीयमानः लोपः नित्यः उत वैकल्पिकः? किं प्रमाणम्?

६. 'अक्षौहिणी'शब्दस्य कः विग्रहः दीक्षिताभिप्रेतः? अत्र प्राचां विग्रहं सयुक्ति निराकुरुत।

७. 'नान्तः पादम्..' इति पाठे अङ्गीकृते 'सर्वत्र विभाषा गोः' इत्यत्र को दोषः स्यात्?

IV. **सूत्रं/वार्त्तिकं यथाग्रन्थं विवृणुत (द्वे एव) ।** 9x2 = 18

१. स्थानिवदादेशोऽनल्विधौ।

२. यणः प्रतिषेधो वक्तव्यः।

३. एत्येधत्यूठसु।

४. अव्यक्तानुकरणस्यात इतौ।